# makArAdi shrImatsyAShTottarashatanAmastotram

# મકારાદિ શ્રીમત્સ્યાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : makArAdi matsyAShTottarashatanAmastotram

File name : makArAdimatsya108nAmastotram.itx

Category : aShTottarashatanAma, vishhnu, dashAvatAra, paNDita-bellaMkoNDa-rAmarAya-kavIndra, vishnu

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# મકારાદિ શ્રીમત્સ્યાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રી હયગ્રીવાય નમઃ ।

હરિઃ ૐ

મત્સ્યો મહાલયામ્ભોધિસઞ્ચારી મનુપાલકઃ ।
મહીનૌકાપ્ર િષ્ટદેશો મહાસુરવિનાશનઃ ॥ ૧॥

મહામ્નાયગણાહર્ત્રા મહનીયગુણાદ્ભુતઃ ।
મરાલવાહવ્યપનચ્છેત્તા મથિતસાગરઃ ॥ ૨॥

મહાસત્વો મહાયાદો ગણભુઙ્મધુરાકૃતિઃ ।
મદોલ્લુંઠનસઙ્ક્ષુબ્ધ સિન્ધુભઙ્ગહતોર્ધ્વખઃ ॥ ૩॥

મહાશયો મહાધીરો મહૌષધિસમુદ્ધરઃ ।
મહાયશા મહાનન્દો મહાતેજા મહાવપુઃ ॥ ૪॥

મહીપઙ્કવૃષત્પૃષ્ઠો મહાકલ્પાર્ણવહ્રદઃ ।
મિત્રશુભ્રાંશુવલયનેત્રો મુખમહાનભાઃ ॥ ૫॥

મહાલક્ષ્મીનેત્રરૂપગર્વસર્વઙ્કુષાકૃતિઃ ।
મહામાયો મહાભૂતપાલકો મૃત્યુમારકઃ ॥ ૬॥

મહાજવો મહાપૃચ્છચ્છિન્નમીનાદિરાશિકઃ ।
મહાતલતલો મર્ત્યલોકગર્ભો મરુત્પતિઃ ॥ ૭॥

મરુત્પતિસ્થાનપૃષ્ટો મહાદેવસભાજિતઃ ।
મહેન્દ્રાદ્યખિલપ્રાણિમારણો મૃદિતાખિલઃ ॥ ૮॥

મનોમયો માનનીયો મનસ્વી માનવર્ધનઃ ।
મનીષિમાનસામ્ભોધિ શાયી મનુવિભીષણઃ ॥ ૯॥

મૃદુગર્ભો મૃગાઙ્કાભો મૃગ્યપાદો મહોદરઃ ।
મહાકર્તરિકાપુચ્છો મનોદુર્ગમવૈભવઃ ॥ ૧૦॥

મનીષી મધ્યરહિતો મૃષાજન્મા મૃતવ્યયઃ ।
મોઘેતરોરુસઙ્કલ્પો મોક્ષદાયી મહાગુરુઃ ॥ ૧૧॥

મોહાસઙ્ગસમુજ્જૃમ્ભત્સચ્ચિદાનન્દવિગ્રહઃ ।
મોહકો મોહસંહર્તા મોહદૂરો મહોદયઃ ॥ ૧૨॥

મોહિતોત્તારિતમનુર્મોચિતાશ્રિતકશ્મલઃ ।
મહર્ષિનિકરસ્તુત્યો મનુજ્ઞાનોપદેશકઃ ॥ ૧૩॥

મહીનૌબન્ધનાહીન્દ્રરજ્જુબદ્ધૈકશૃઙ્ગકઃ ।
મહોવાતહતોર્વીનૌસ્તમ્ભનો મહિમાકરઃ ॥ ૧૪॥

મહામ્બુધિતરઙ્ગાપ્તસૈકતીભૂતવિગ્રહાગઃ ।
મરાલવાહનિદ્રાન્તસાક્ષી મધુનિષૂદનઃ ॥ ૧૫॥

મહાબ્ધિવસનો મત્તો મહામારુતવીજિતઃ ।
મહાકાશાલયો મૂર્છત્તમોમ્બુધિકૃતાપ્લવઃ ॥ ૧૬॥

મૃદિતાબ્જારિવિભવો મુષિતપ્રાણિચેતનઃ ।
મૃદુચિત્તો મધુરવાઽભૃષ્ટકામો મહેશ્વરઃ ॥ ૧૭॥

મરાલવાહસ્વાપાન્ત દત્તવેદો મહાકૃતિઃ ।
મહીશ્લિષ્ટો મહીનાથો મરુન્માલામહામણિઃ ॥ ૧૮॥

મહીભારપરીહર્તા મહાશક્તિર્મહોદયઃ ।
મહન્મહાન્મગ્નલોકો મહાશાન્તિર્મહન્મનાઃ ॥ ૧૯॥

મહાવેદાભિસઞ્ચારી મહાત્મા મોહિતાત્મભૂઃ ।
મન્ત્રસ્મૃતિભ્રંશહેતુર્મન્ત્રકૃન્મન્ત્રશેવધિઃ ॥ ૨૦॥

મન્ત્રમન્ત્રાર્થ તત્ત્વજ્ઞો મન્ત્રાર્થો મન્ત્રદૈવતમ્ ।
મન્ત્રોક્તકારિપ્રણયી મન્ત્રરાશિફલપ્રદઃ ॥ ૨૧॥

મન્ત્રતાત્પર્યવિષયો મનોમન્ત્રાદ્યગોચરઃ ।
મન્ત્રાર્થવિત્કૃતક્ષેમો રામં રક્ષતુ સર્વતઃ ॥ ૨૨॥

॥ ઇતિ મકારાદિ શ્રી મત્સ્યાષ્ટોત્તરશતનામસ્તોત્રમ્ પરાભવ
શ્રાવણશુદ્ધ પૂર્ણિમાયાં લિખિતા રામેણ સમર્પિતા ચ
શ્રી હયગ્રીવ ભગવચ્ચરણારવિન્દયોર્વિજયતાન્તરામ્ ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

*makArAdi shrImatsyAShTottarashatanAmastotram*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*